# संस्कृतवार्ता:

**दिनाङ्क :-06.03.2025**

**प्रात: - 06:55**

**अथ वार्ता:**

**प्रधानमन्त्री- उत्तराखण्डम्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य उत्तराखण्डराज्यं प्रति यास्यति। असौ मुखबा इत्यत्र गङ्गामातु: शीतकालिकप्रवासे पूजार्चनां दर्शनं च करिष्यति। श्रीमोदी अत्रावधौ द्विचक्रिकाभियानाय दुर्गमपदयात्रायै च हरितध्वजं प्रदर्शयिष्यति। अथ च एकस्मिन् सार्वजनिकसमारोहे जनसमूहं सम्बोधयिष्यति। ध्यातव्यमस्ति यत् उत्तराखण्डप्रशासनेन अस्मिन् वर्षे शीतकालिक-पर्यटन-कार्यक्रम: समारब्ध:। सहस्राधिकसङ्ख्यका: श्रद्धालव: पूर्वमेव गङ्गोत्री-यमुनोत्री-केदारनाथ-बद्रीनाथ-धाम्नाम् शीतकालिक-प्रवासानां यात्रां सम्पूरितवन्त:। अस्य कार्यक्रमस्य उद्देश्यं धार्मिकपर्यटनस्य संवर्धनम् तथा च स्थानीयार्थव्यवस्थायां पर्यटनव्यवसायस्य च संवर्धनमिति वर्तते।

**जयशङ्कर: - ब्रिटेनयात्रा**

विदेशमन्त्री डॉ. एस्. जयशङ्कर: विगतयो: द्वयो: दिनयो: स्वीयेन ब्रिटेनदेशीयेन समकक्षेण डेविड-लैमी इत्यमुना साकं व्यापकीं चर्चां समनुष्ठितवान्। एकस्मिन् सामाजिकान्तर्जालीयसन्देशे डॉ. जयशङ्कर: अलिखत् यत् उभौ पक्षौ द्विपक्षीय-सम्बन्धानाम् सम्पूर्णेषु पक्षेषु चर्चां विहितवन्तौ। चर्चावधौ कार्यनीतिक-समन्वयनाय राजनीतिक-सहयोगाय व्यापारिक-गतिविधये च विशिष्टं ध्यानं प्रदत्तम्। असौ अग्रे अवोचत् यत् उभौ पक्षौ एतेषां विषयाणां प्रबलीकरणाय सहमतौ अभवताम्। अपि च यूक्रेन-सङ्घर्षं पश्चिमैशियाविषयं बाङ्ग्लादेशं राष्ट्रमण्डलं च समेत्य क्षेत्रीय-वैश्विक-प्रसङ्गयो: विचाराणाम् आदानप्रदानं जातम्। अवधेयास्पदं वर्तते यत् डॉ. जयशङ्कर: यो हि अस्य मासस्य नवम दिनाङ्कात् ब्रिटेन-आयरलैण्ड-देशयो: आधिकारिकयात्रायामस्ति। स: अद्य आयरलैण्डराष्ट्रस्य द्विदिवसीय-यात्रायै प्रस्थितो भविष्यति। तत्र डॉ. जयशङ्कर: स्वीयेन आयरिशसमकक्षेण साइमनहैरिस-इत्येतेन अन्यै: गणमान्यजनैश्च सह वार्तालापं कृत्वा भारतीय-समुदायै: सह मेलनं करिष्यति।

**मन्त्रिमण्डलम्-स्वीकृति:**

प्रशासनेन सोनप्रयागत: केदारनाथपर्यन्तं द्वादश दशमलव नवकिलोमीटर परिमितस्य दीर्घस्य रज्जुमार्गस्य विकासाय अनुमति: प्रदत्ता। नवदिल्ल्यां वार्ताहरै: सह सम्भाषमाण: सूचनाप्रसारणमन्त्री अश्विनीवैष्णव: सूचितवान् यत् अस्या: परियोजनाया: कुलव्यय: चतु: सहस्रकोटिरूप्यकाणि यावत् भविष्यति इति।

श्रीवैष्णवेन द्वादश दशमलव चतु: किलोमीटर परिमितस्य लम्बमानस्य हेमकुण्ड-साहिब-रज्जुमार्गस्य विषयेऽपि सूचितवान् योहि त्रिंशदधिक-सप्तशत-कोटिरूप्यकाणां व्ययेन निर्मीयते। प्रशासनेन पशुधन-स्वास्थ्यस्य रोग-निवारणस्य च विषयेऽपि अशीत्यधिकाष्ट-शतोत्तर-त्रिसहस्रकोटिरूप्यकाणां व्ययेन निर्णय: निर्णीत:।

माण्डविया:- व्याख्यानम्

केन्द्रीयश्रममन्त्री डॉ. मनसुख-माण्डविया: कथितवान् यत् भारतस्य सामाजिकसुरक्षाव्याप्ति: चत्वारि दशांशोत्तर चतुर्विंशति प्रतिशतत: द्विगुणं भूत्वा अष्ट दशांशोत्तर अष्टचत्वारिंशत्प्रतिशतं यावत् संवर्धितास्ति। जनानां कृते निवेश: इत्येतस्मिन् शीर्षके आधारितम् अर्थ- सङ्कल्पनापत्रस्य अनन्तरं आयोजितम् आन्तर्जालिकं सम्मेलनम् सम्बोधयत: मन्त्रिणा प्रतिपादितं यत् कस्यापि राष्ट्रस्य बृहत्तमा सम्पत्ति: तस्य राष्ट्रस्य जना एव भवन्तीति। असौ कथितवान् यत् दश नवीनेभ्य: कर्मचारि-राज्यागोप-निगमस्य चिकित्सकीय महाविद्यालयेभ्य: स्वीकृति: प्रदत्ता।

क्रिकेट् प्रतिस्पर्धा

पुरूषाणाम् आई.सी.सी. चैम्पियन्स-ट्रॉफी इत्येतस्यां क्रिकेट: प्रतिस्पर्धायाम् ह्य: रात्रौ लाहौरनगरे द्वितीये उपान्त्यचक्रे न्यूजीलैण्डदलेन दक्षिणाक्रीकादलं पञ्चाशत्धावनाङ्कै: पराजयित्वा निर्णायकचक्रके द्वन्द्वे भारतीयदलेन साकं क्रीडिष्यते।